राजनिर्घण्टः। (यथा मेघदूते,पूर्ब्बमेघे। ५४।
"आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्"।
सुश्रुते,—
"दाहातिसारपित्ताह्वमूर्च्छामद्यविषार्त्तिषु"।)
आर्द्रं, त्रि, (अर्द्द + रक् दीर्घश्च।) सजलवस्तु। भिजा
इति भाषा। तत्पर्य्यायः। सार्द्रं २ क्लिन्नं ३ स्ति-
मितं ४ तिमितं ५ समुन्नं ६ उत्तं ७। इत्यमरः॥
(तच्च द्विविधं यदुक्तं,—
'आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा।
सदुग्धं शुष्करसकं द्विधा नीरसमुच्यते॥
वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकम्।
धुस्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते॥
वटाश्वत्थकरीराद्यमार्द्रद्रव्यं तु नीरसं।
सदुग्धं तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात्।
शातला वचसीहुण्डसीरिण्याद्यास्तु तीक्ष्णकाः।
दुग्धिकार्कक्षीरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः"॥
यथा रघुवंशे, "आर्द्रांक्षतारोपणमन्वभूतां"।
मेघदूते उत्तरमेघे २५।
"तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्")॥
आर्द्रकं, क्ली, (अर्द्दयति कफं आर्द्रं। ततः कन्। यद्वा
आर्द्रयति जिह्वायां। क्वुन्।) कटुमूलविशेषः।आदा
इति भाषा। तत्पर्य्यायः। शृङ्गवेरं २ इत्यमरः॥
कटुभद्रं ३ कटूत्कटं ४। इति केचित्। गुल्ममूलं ५
मूलजं ६ कन्दरं ७ वरं ८ महीजं ९ सैकतेष्टं १०
अनूपजं ११ अपाकशाकं १२ चान्द्राख्यं १३ राज-
क्षत्रं १४ सुशाककं १५ शार्ङ्गं १६ आर्द्रशाकं १७
सच्छाकं १८। इति राजनिर्घण्टः॥ अस्य गुणाः।
कफवातविबन्धानाहशूलपित्तनाशित्वं। हृद्यत्वं।
वह्निशुक्रकारित्वञ्च। इति राजवल्लभः॥ अपिच।
उष्णत्वं। कटुत्वं। विपाके शीतलत्वं। लघुत्वं।
अग्निदीपनत्वं। शोथकण्ठामयनाशित्वञ्च। इति
राजनिर्घण्टः॥ लवणार्द्रकगुणाः। भोजनाग्रे
पथ्यत्वं। जिह्वाकण्ठविशोधनत्वं। अग्निसन्दी-
पनत्वं। हृद्यत्वं,—
"वातपित्तकफेभानां शरीरवनचारिणां।
एक एव निहन्तास्ति लवणार्द्रककेशरी"॥
इति दत्तगुप्तः,—
"आर्द्रकं शृङ्गवेरं स्यात् कटुभद्रं तथार्द्रिका।
आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी तथा।
कटुका मधुरा पाके रूक्षवातकफापहा।
ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः।
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनं॥
कुष्ठे पाण्ड्वामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकं"॥
इति भावप्रकाशः॥
(तद्वदार्द्रकमेतच्च, इति वाभटः॥
"रोचनं दीपनं वृष्यमार्द्रकं विश्वभेषजं।
वातश्लेष्मविबन्धेषु रसस्तस्योपदिश्यते"॥
इति चरकः॥
"कफानिलहरं स्वर्य्यं विबन्धानाहशूलनुत्।
कट्‌वुष्णं रोचनं हृद्यं वृष्यञ्चैवार्द्रकं स्मृतम्"॥

इति सुश्रुतः॥)
आर्द्रपटी, [न्] पुं, (आर्द्रपट + इनि।) आर्द्ररक्तवस्त्रा-
हतकर्त्तृकशत्रुनाशफलकाभिचारकर्म्मविशेषः।
यथा। "अथार्द्रपटी। प्रणवो हृदयं भगवति चा-
मुण्डे रक्तवाससे अप्रतिहतरूपपराक्रमे अमुक-
बधाय विचेतसे वह्निवल्लभा। आर्द्ररक्तपटेनाहतः
समुद्रगामिनीनदीतटे ऊषरभूमौ वा दक्षिणा-
मुख ऊर्द्धबाहुर्जपेत् यावत् पटः शुष्यति तावत्
प्राणाः शुष्यन्ति शत्रोः"। इति तन्त्रसारः॥
आर्द्रपटविशिष्टे, त्रि॥
आर्द्रमाषा, स्त्री, माषपर्णी। इति राजनिर्घण्टः॥
माषाणी इति भाषा।
आर्द्रशाकं, क्ली, (आर्द्रं शाकमस्य।) आर्द्रकं। इति
राजनिर्घण्टः॥
आर्द्रा, स्त्री, (आर्द्र + टाप्।) अश्विन्यादिसप्तविंशति-
नक्षत्रान्तर्गतषष्ठनक्षत्रं। अस्य रूपं। पद्मरागतु-
ल्यैकतारकामयं। अस्या अधिष्ठात्री देवता
शिवः। इति कालिदासः॥ मणितुल्यैकताराात्मकं।
इति केचित्॥ तत्र जातफलं।
"क्षुधाधिको रूक्षशरीरकान्तिः
कलिप्रियः कोपयुतोऽविनीतः।
प्रसूतिकाले च भवेत् किलार्द्रा
नचार्द्रचेताः शरणागतेऽपि"।
इति कोष्ठीप्रदीपः॥
आर्द्रालुब्धकः, पुं, (आर्द्रायां तन्नाम्ना प्रसिद्धनक्षत्रे
लुब्धक इव।) केतुग्रहः। इति हलायुधः॥
आर्द्रिका, स्त्री, (आर्द्रक + टाप्।) आर्द्रकं। इति
भावप्रकाशः॥
("आर्द्रिका तिक्तमधुरा मूत्रला न च पित्तहृत्"॥
इति वाभटः।)
आर्य्यः, त्रि, (अर्त्तुं प्रकृतमाचरितुं योग्यः। अर्य्यते
वा। ऋ + ण्यत्।) सत्कुलोद्भवः। इत्यमरः।
पूज्यः। श्रेष्ठः। बन्धुः। इति शब्दरत्नावली॥
सङ्गतः। इत्यजयः॥ (मान्यः, उदारचरितः, शा-
न्तचित्तः। यथा, रामायणे, ३ काण्डे।
"योऽहमार्य्येण परवान् भ्रात्रा ज्येष्ठेन भाविनि"।
न्यायपथावलम्बी, प्रकृताचारशीलः, सततकर्त्तव्य-
कर्म्मानुष्ठाता। यदुक्तं,
"कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्।
तिष्ठति प्राकृताचारे स तु आर्य्य इति स्मृतः"॥
धार्म्मिकः। धर्म्मशीलः। यथा, मनुः, १०। ५७।
"आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत्"।
उचितः। यथा, रामायणे,—
"मार्गमार्य्यं प्रपन्नस्य नानुमन्येत कः पुमान्"॥
नाट्योक्तौ सम्मानसूचकमिदं नाम प्रायेण मान्य-
जनाह्वाने व्यवह्रियते। यथा, साहित्यदर्पणे, षष्ठ-
परिच्छेदे।
"स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः"।
"वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परं"॥)
आर्य्यः, पुं, (अर्त्तुं सदाचरितुं योग्यः। ऋ + ण्यत्।)
स्वामी। बन्धुः। इति हेमचन्द्रः॥ सुहृत्। इत्यजयः॥
(श्रेष्ठवर्णः। म्लेच्छेतरजातिः। यदुक्तं महाभारते।

"म्लेच्छाश्चान्ये बहुविधाः पूर्व्वं ये निकृता रणे।
आर्य्याश्च पृथिवीपालाः"। इति॥ स्वनामख्यातः
सावर्णमनोः पुत्रः। यथा, हरिवंशे।
"वरीयांश्चावरीयांश्च संमतो धृतिमान् वसुः।
चरिष्णुरार्य्यो धृष्णुश्च राजः सुमतिरेव च।
सावर्णस्य मनोः पुत्राः भविष्या दश भारत!"॥)
आर्य्यकं, क्ली, पितृपाणादिपितृकार्य्यं। इति त्रि-
काण्डशेषः॥
आर्य्यकः, पुं, (आर्य्य + स्वार्थे कन्।) पितामहः। मा-
तामहः। इति शब्दमाला॥ (यथा रामायणे,—
"अद्य ते कतिचिद्रात्र्यश्च्युतस्यार्य्यकवेश्मनः"।
"आर्य्यकस्ते तु कुशली युधाजिन्मातुलस्तव"॥
महाभारते,—
"आर्य्यकेण च दृष्टः स पृथाया आर्य्यकेण च।
तदा दौहित्रदौहित्रः परिष्वक्तः सुपीडितम्"॥
पूज्यव्यक्तिमात्रम्। स्वनामख्यातो नागश्रेष्ठः,
यथा महाभारते,—
"आर्य्यकश्चोग्रकश्चैव नागः कलशपोतकः"।)
आर्य्यका, स्त्री, (आर्य्यक + टाप्। उदीचामात इति
पक्षे इत्वाभावः।) श्रेष्ठा स्त्री। इति वोपदेवः॥
आर्य्यपुत्त्रः,पुं, (आर्य्यस्य पुत्त्रः। षष्ठीतत्पुरुषः।) भर्त्ता।
स्वामी। इति हेमचन्द्रः॥ (यथा रामायणे,—
"आर्य्यपुत्त्र! पिता माता भ्राता पुत्त्रस्तथा स्नुषा।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते"॥)
गुरुपुत्त्रः। मान्यस्य पुत्त्रः।)
आर्य्यमिश्रः,त्रि, (आर्य्यः श्रेष्ठो मिश्रश्च।) गौरवितः।
इति त्रिकाण्डशेषः॥ (माननीयः, पूज्यः। यथा
रामायणे, २ काण्डे।
"समस्तमार्य्यमिश्राणां साधूनां गुणवर्त्तिनाम्"।
उत्तरचरिते, प्रस्तावनायां।
"अद्य खलु भगवतः कालप्रियनाथस्य यात्राया-
मार्य्यमिश्रान् विज्ञापयामि"।)
आर्य्या, स्त्री, (ऋ + ण्यत् + स्त्रियां टाप्।) पार्व्वती।
इति त्रिकाण्डशेषः।छन्दोविशेषः। तस्या लक्षणम्।
"यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या"॥
इति श्रुतबोधः॥ अपिच।
"लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः।
षष्ठो जश्च न लघुर्वा प्रथमेऽर्द्धे नियतमार्य्यायाः॥
षष्ठे द्वितीयलात्परके ले मुखलाच्च सयतिपदनियमः।
चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः"॥
सा नवधा।
"पथ्या विपुला चपला मुखचपला जघनचपला च।
गीत्युपगीत्युद्गीतय आर्य्यागीतिश्च नवधार्य्या"॥
इति छन्दोमञ्जरी॥ श्रेष्ठा स्त्री॥
आर्य्यावर्त्तः, पुं, (आर्य्या आवर्त्तन्तेऽत्र। आर्य्य +
आ + वृत् + आधारे घञ्।) विन्ध्यहिमाचल-
योर्मध्यदेशः। तत्पर्य्यायः। पुण्यभूमिः २। इत्य-
मरः॥ यथा,—
"आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात्।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः"॥
इति मानवे २। २२॥ अपि च, अमरे।—